卐 श्रीश्रीगौरहरिर्जयति 卐

प्रकाशितग्रन्थसंख्या:—१५२.

रागानुगा-विवृतिः

श्रीलश्रीरूपकविराज-महोदय-विरचिता

रागानुगाविवृतिविनोदिनी-नाम्नी

हिन्दिभाषानुवादेनालंकृता

सम्वत्—२०२६

प्रकाशक:—

न्योछावर ५० पैसे

कृष्णदासबाबा

※ जय-गौरहरिः ※

भूमिका

श्रीरूप-गोस्वामि-प्रभु-पादने निज-विरचित भक्तिरसामृतसिन्धु नामक विशाल ग्रन्थ में द्वादश रस का विवेचन करते हुए श्रीकृष्ण में ब्रजवासियों की भक्ति को रागात्मिका भक्ति करके निर्द्धारित किया एवं उस रागात्मिका भक्ति का अनुसन्धान देते हुए तदनुगत उपासकों की भक्ति को रागानुगा भक्ति करके बतलाया। यथा—

"इष्टे स्वारसिकी-रागः परमाविष्टता भवेत्।
तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोच्यते॥"
"विराजन्तीमभिव्यक्तिं ब्रजवासिजनादिषु।
रागात्मिकामनुसृता या सा रागानुगोच्यते"॥

(भक्तिरसामृतसिन्धु में)

श्रीलरूपिकविराज-महोदय चरण ने इन दो श्लोकों पर अत्यन्त गवेषणा के साथ महान् विचार करते हुए "रागानुगाविवृति" नाम से व्याख्या लिखी जो कि—उनके अगाध-पाण्डित्य का परिचय दे रही है। रागात्मिका एवं रागानुगा-भक्ति के बारे में इस प्रकार प्रगाढ़ गवेषणापूर्ण विचार अन्यत्र कहीं उपलब्धि नहीं होगी। श्रीलविश्वनाथचक्रवर्त्ती जी ने रागानुगाभक्ति के बारे में संस्कृत में रागवर्त्मचन्द्रिका नामक ग्रन्थ लिखा जिसमें

उन्होंने रागानुगा-भक्ति का सरलभाषा में सुन्दर विचार किया जो कि रागानुगा-पथिक, अनधीत व्याकरण वाले भक्तगणों के लिये परम उपादेय हुआ। परन्तु इस रागानुगा-विवृति में धुरन्धर दार्शनिक पण्डित श्रीरूपकविराजचरण ने पण्डित उपासकों को तदुचित भाषा से समझाते हुए रागानुगा-भक्ति का अनुसन्धान देकर जो उपकार किया उसे रागानुगा-पिपासु भक्त-समाज नहीं भूलेगा। व्याख्याकार प्रबल दार्शनिक पण्डित थे इस से स्पष्ट ज्ञात होता है। आपके द्वारा विरचित "सारसंग्रह" भी उज्वलनीलमणि-प्रतिपादित 'महाभाव" स्वरूप सम्बन्धी एक श्लोक की विचारपूर्ण व्याख्या है। उक्त ग्रन्थ कलकत्ता-नगरी से सुन्दर रूप से प्रकाशित हुआ है। श्रीरूपकविराज-महोदय जी श्रीप्रभु-रूपगोस्वामी जी के प्रति अपने जो प्रबल अनुराग-निष्ठा दिखलाई है वह इस रागानुगा-विवृति-व्याख्या के प्रारम्भ में उद्धृत "आददानस्तृणं दन्तैरिदं याचे पुनः पुनः। श्रीमद्रूपपदाम्भोजधूलिभूयां भवे भवे" इस श्लोक से स्पष्ट तया व्यक्त हो रही है।

हम भी उन की श्रीरूप-गोस्वामी के प्रति इस प्रकार प्रबल भाव-निष्ठा को देख मुग्ध होकर इस समय उन की कृति-रूप इस ग्रन्थ का प्रकाशन में अत्यन्त व्यग्र एवं गुरु गौरांग की पुनीत कृपा से सफल मनोरथ भी हुए। ग्रन्थकार ने इस विवृति-व्याख्या में स्वल्पाक्षर में महाप्रभु-गौरांगदेव के स्वरूप निर्णय बारे में जो विचार-धारा बतलाई है वह अत्यन्त अद्भुत एवं अश्रुतपूर्व है, जिसका आस्वादन व अनुभव भक्तजनता मात्र का तथा गौरभक्त-गणों का करना चाहिये। अस्तु—जब कि हम हस्तलिखित अप्रकाशित प्राचीन ग्रन्थों का खोज में रहे तब हमें प्रायतः समस्त लाईब्रेरी में इसकी हस्तलिखित प्राचीन

कापियाँ देखने को मिलीं। इसकी भाषा-परिपाटी, शब्द विन्यास एवं विचार-धारा को देखकर हम बड़े मुग्ध हुए और हमने इसका प्रकाशन के लिये एक पाण्डुलिपी प्रस्तुत की। विगत-कुछ दिनों से अनुबाद करने में एवं प्रकाशन-कार्य में अत्यधिक परिश्रम के हेतु प्राय: करके अस्वस्थ रहता हूँ। सुदीर्घकाल से परिश्रम के कारण मस्तिस्क में तथा साथ ही साथ शरीर में कमजोरी आ जाती है। मैं प्राय करके पतले दुवले रहता हूँ, इसका कारण अत्यधिक मस्तिस्क का परिश्रम। जब कि मैं अत्यधिक बीमार था तब मैंने इसका अनुबाद के लिये श्रीहरि-दास जी शास्त्री-महोदय, कालिदह्-निवासी से आग्रह किया, आपने अत्यन्त-प्रीति के साथ अनुबाद कर प्रकाशन के लिये सौंपा। अत्यन्त कठिनाई से इसका प्रकाशन हुआ भी तो है परन्तु जिस प्रकार प्रकाशन होना था उस प्रकार नहीं होने पाया। इसका कारण यह ग्रन्थ अत्यन्त दुरूह, कठिन विचार पूर्ण रहा। नवीन शैली से यह व्याख्या सुसज्जित हुई है। आगे द्वितीय संस्करण में सुन्दर-रूप से इसका प्रकाशन करने की आशा रखते हैं। श्रद्धेय द्वारभंगा-वेणीपट्टी निवासी बाबा रासबिहारीदास जी महाराज जो विहार-प्रान्त में असंख्य नर-नारियों को नैष्ठिक गौर-भक्त बनाकर भक्ति का परिचय दिला रहे हैं और जो हम को अत्यन्त श्रद्धा के साथ प्राचीत साहित्य प्रकाशन में उत्साहित करते रहते हैं उन्होंने ही इस का प्रकाशन में सब प्रकार से सहायता दिला कर उत्साहित किया है। उन को हम हार्दिक धन्दवाद देकर उनकी प्रसन्नता के लिये उन्हीं को ही यह कृति समर्पण करते हैं। मुद्रणविषय में प्रेस की गल-तियाँ बहुत रह गयीं, आगे द्वितीय संस्करण में उन गलतियों को सुधारकर विस्तृत सरल अनुबाद के साथ प्रकाशित करेंगे।

शेष में नित्यधामगत "श्रीजीवसेवासंघ" के प्रतिष्ठाता श्रीराधा-गोविन्ददास जी को हम हार्दिक धन्यवाद देते हैं कि जिन्होंने विहार-प्रान्त के बहुत जीवों को हरिभक्ति-सन्धान देकर बड़ा उपकार किया। अवशेष में हम पण्डित श्रीमुनीन्द्रझाँ, श्रीमान् जुगलप्रियादास जी, नवलकिशोरदास जी महाराज, पण्डित श्री श्यामसुन्दरदास जी, पण्डित श्रीचन्द्रशेखर जी, श्रीमान् कुमारलाल पाण्डेय जी, श्रीमान् बाबु जगदीश जी, श्रीगोविन्द-दास जो (वृन्दावन), श्री मनमोहनदास जी (वृन्दावन) आदि गौर-भक्ति-प्रचारक महानुभावों को हार्दिक धन्यबाद देकर साहित्य-सेवा में उत्साहित करते हैं। इस रागानुगाविवृति के वंगभाषा में दो पद्यानुबाद प्राप्त हैं। एक तो श्रीभगवानदासजी के द्वारा विरचित "रागानुगाविवृति-भाषा" नामक विस्तृत पद्यानुवाद, जिसमें आठ अध्याय हैं। दूसरा पद्यानुबाद किसी गोविन्ददास जी द्वारा विरचित "रागानुगाचन्द्रिका" नाम से है। दोनों महत्पूर्ण रचना बाले हैं। जिनका प्रकाशन अवश्य होना चाहिये,जिससे रागानुगा-भक्ति इच्छुक साधकों का महान् उपकर हो॥ इति॥ रागानुगा-उपासक-वैष्णवदासानु-दास—कृष्णदास बाबा (झूलन तृतीया)

ऐशबुद्धिवासितात्मलोकवृन्ददुर्ल्लभा
व्यक्तरागवर्त्मरत्नदान–विज्ञवल्लभा।
सप्रियालि-गोष्ठपालि-केलिकीर-पञ्जरी
मामुरीकरोतु नित्येदह-रूपमञ्जरी॥

(साधनदीपिकायाम्)

विनीत—कृष्णदास

रागानुगाविवृतिः

॥ श्रीकृष्णचैतन्यचन्द्राय नमः ॥

आददानस्तृणं दन्तैरिदं याचे पुनः पुनः ।
श्रीमद्रूपपदाम्भोजधूलिर्भूयां भवे भवे ॥

अथ साधनचतुष्टये प्रथमं मुख्यसाधनविवृतिः ।

"इष्टे स्वारसिकी-रागः परमाविष्टता भवेत् ।
तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोच्यते" ॥

अत्राविष्टता रागकार्य्यरूपा तस्यास्तटस्थलक्षणेनानुवाद-वैचेष्टितग्रहणाय । तत्तु रागानुगायां चेष्टितग्रहणापेक्षया । सा तु तस्यां कायिकी-वाचिकीतिभेदद्वयस्वीकाराय, सातु सवदा ब्रज-लोकानुसाराय, स श्रीब्रजेन्द्रनन्दनप्राप्तये, अन्यथा सा न स्यात् । अत आविष्टता त्रिधा मनोगता वाग्गता कायगतेति । अत्र मनोगता स्वगतादिरूपा, अतो रागानुगायां तदनुसारिणी साधकरूपेण सिद्धरूपेण च सेवा प्रत्येकं त्रिधा मानसी वाचिकी कायिकीति ।

रागानुगालक्षणम्—

"विराजन्तीमभिव्यक्तं ब्रजवासिजनादिषु ।
रागात्मिकामनुसृता या सा रागानुगोच्यते" इति ।

रागात्मिका द्विधा, सम्बन्धरूपा कामरूपेति । अत्र सम्बन्ध-रूपालक्षणम्—"सम्बन्धरूपा गोविन्दे पितृत्वाद्यभिमानिते" ति । अत्र पितृत्वाद्यभिमानिता पितृत्वाद्यभिमानकार्य्यरूपा स्वारसिकी परमा मनोवाक्कायाविष्टता । अतः सम्बन्धानुगायां तदनुसारिणी साधकरूपेण सिद्धरूपेण च सेवा प्रत्येकं त्रिधा मानसी वाचिकी कायिकीति ।

कामानुगालक्षणम्—

कामानुगा भवेत्तृष्णा कामरूपानुगामिनी ।
सम्भोगेच्छामयी तत्तद्भावेच्छात्मेति सा द्विधा ।

अत्र सम्भोगेच्छा तत्कार्यरूपा यूथेश्वरीगतस्वारसिकी परममनोबाक्कायाविष्टतानुसारिणी साधकरूपेण सिद्धरूपेण च सेवा, प्रत्येकं त्रिधा मानसी वाचिकी कायिकीति । तत्तद्भावेच्छा भावेति चेष्टितोपलक्षणं "भावचेष्टितमुद्रये"ति वचनात् । अतस्तत्तद्भावचेष्टितेच्छा तत्कार्यरूपा श्रीरूपमञ्जर्य्यादिगत-स्वारसिकी परम मनोवाक्कायाविष्टतानुसारिणी साधकरूपेण सिद्धरूपेण च सेवा, प्रत्येकं त्रिधा मानसी वाचिकी कायिकीति । 'कृष्णं स्मरन् जनश्चास्य प्रेष्ठं निजसमीहितम्। तत्तत्कथारतश्चासौ कुर्य्याद्वासं व्रजे सदे' त्यत्र स्मरन्निति-सिद्धरूपेण मानसी वाचिकी कायिकी सेवा दर्शिता । साधकरूपेण च मानसी–सेवा दर्शिता । "तत्तत्कथारतश्चासावि" ति साधकरूपेण कीर्त्तनश्रवणाभ्यां वाचिकी कायिकी सेवा दर्शिता । "कुर्य्याद्वासं व्रजे सदे"ति साधक–रूपेण, पुनः कायिकी–सेवा दर्शिता ॥

रागानुगाधिकारिणो लक्षणम् –

"रागात्मिकैकनिष्ठा ये व्रजवासिजनादयः ।
तेषां भावाप्तये लुब्धो भवेदत्राधिकारवानिति"॥

अत्र भावोक्तलक्षणा रागात्मिका, अस्या आश्रय विशेषकत्वात् । "लुब्धैर्वात्सल्यसख्यादौ भक्तिः कार्य्यात्र साधकैः । व्रजेन्द्रसुबलादीनां भावचेष्टितमुद्रया" अत्र भाव-चेष्टित मुद्रयेति सिद्धरूपेण मानसी वाचिकी कायिकी–सेवा दर्शिता । साधकरूपेण च मानसी सेवा दर्शिता । चेष्टितमुद्रयेति साधकरूपेण वाचिकी कायिकी सेवा दर्शिता । "तत्तद्भावादिमाधुर्य्ये श्रुते धीर्यदवेक्षते । नात्र शास्त्रं न युक्तिश्च तल्लोभोत्पत्तिलक्षण''मित्यत्र तत्तद्भावा-दि-माधुर्य्य इत्यत्रादिशब्दाच्चेष्टितम् । अतो भावचेष्टामाधुर्य्ये

श्रुते सति धीर्भावचेष्टामाधुर्य्यं यदपेक्षते कदेदं भावमाधुर्य्यं चेष्टा-माधुर्य्यञ्च मम भवेदिति। किञ्च तत्रापेक्षणे शास्त्रयुक्तिञ्च नापेक्षते तल्लोभोत्पत्तेर्लक्षणं स्वरूपम्। अत्र भावचेष्टितमाधुर्य्य इति जातलोभस्य श्रीकृष्ण-तद्भक्तकारुण्येन सर्वथा व्रजलोकानु-सारश्चेत्तदा तस्य सिद्धरूपेण मानसी वाचिकी कायिकी सेवा दर्शिता, साधकरूपेण च मानसी सेवा दर्शिता। चेष्टितमाधुर्य इति पुनस्तस्य साधकरूपेण वाचिकी कायिकी सेवा दर्शिता। साधक-रूपेण क्रियमाणयोर्वाचिक-कायिकसेवयोः साधक-रूपेण मान-स्यामपि सेवायां सद्भावः स्वगतमितिवत् मनसापरिष्वङ्गं कृत-वानितिवच्च ॥

अत्र व्यतिरेकप्रदर्शनम्—

"यत्र रागानवाप्तत्वात् प्रवृत्तिरुपजायते ।
शासनेनैव शास्त्रस्य सा वैधी भक्तिरुच्यते" इति ॥

रागोऽत्र स्वारसिकपरममनोवाक्कायाविष्टतायां मनोवाक्कायैरनुसारः, व्याख्यान्तरे लोभव्यतिरेकप्रदर्शनरूपे सेवा साधकरूपेणेत्यादेरिरंसामित्यादेश्च 'भक्तिः कार्यात्र साधकैः। व्रजेन्द्रसुबलादीनां भावचेष्टितमुद्रये' त्यस्य चाप्रयोजकत्वात्। साधकरूपमन्तः स्थितप्राप्त-श्रीकृष्णादिसंगव्रजजनानुकारिरूप-यथास्थितदेहतयान्तः स्थितयथास्थितदेहाप्राप्तश्रीकृष्णादिसंग-व्रजजनानुकारिरूपतया द्विधा। सिद्धरूपस्य प्राप्तश्रीकृष्णादि-संगव्रजजनानुकारित्वात्। आद्यं बाह्यदशायामन्तिममद्धं बाह्य-दशायामन्तर्दशायामपि क्वचित्। सिद्धरूपन्त्वन्तर्दशायां सदान्त-र्दशायां सिद्धरूपमेव सदा। उभयत्र सदेति बहुकालव्यापित्वात्। तच्चाजातप्रेम्नि तस्याः सार्व्वदिकत्वाभावात्। एतएवाभावं

तटस्थांशानिवृत्तेः। साधकरूपसद्भावेनाभावं लुब्ध प्रात सेवा-साधकरूपेणेत्यादि पदद्योपदेशादस्य पक्षस्य तन्त्रगा व्याख्यात्रयम्। तन्त्रग्रहणमनुकल्पमुख्यकल्पयोः स्वीकाराय। तत्र प्रथमव्याख्या-ऽनर्थनिवृत्तिमभिव्याप्य, द्वितीयव्याख्या रुचिमभिव्याप्य, तृतीय-व्याख्या भावम्। प्रथमव्याख्या द्वितीयव्याख्या च व्यक्ता। तृतीयव्याख्या—

साधकरूपगतान्तर्दशायां यथा :--

वीणा-वैणिकतुल्यत्वं सिद्धसाधकरूपयोः।
यथा तयोर्विभेदेऽपि गानयोरेकतानता॥
तुल्यस्वरूपत्वत्वञ्च तथा तद्रूपयोर्द्वयोः।
भेदेऽपि सेवयोः साम्यमेककालत्वमेव च॥
यथा वैणिकचित्तस्था गीतेर्वीणाभवा तथा।
सेवा साधकरूपस्था सिद्धरूपे प्रवर्त्तते॥
भेदे यथा रसो न स्याद्वीणा-वैणिकगानयोः।
तथा तत् सेवयोर्भेदे व्रजभावो न जायते॥
वैणिके मानसी गीतिर्वीणायां कायिकी क्वचित्।
एवं कालादिसाम्येऽपि मन आदेर्भिदा क्वचित्॥
क्रमो न लाघवाल्लक्ष्यो-वीणा वैणिकगानयोः।
क्रमो न लाघवाल्लक्ष्यः सेवयोरुभयोरपि॥
तटस्थतानन्तर्वान्तर्दशा साधकरूपगा।
तस्या अतिशयादन्तर्दशा स्यात् सिद्धरूपगा॥

लाघवं विशेषः, केवला बहुकालव्यापित्वेऽस्यान्तर्दशा

स्थायिगतत्वे कैवल्येन तत्रापि केवलानुलोम्यगतत्वेनैकदेशव्यापित्वात्, किन्तु सामान्ये केवलस्वरूपोत्कर्षानुलोम्यगतबहुकालव्यापित्वे स्वरूपोत्कर्षप्रातिलोम्यगतौ सिद्धरूपगतान्तर्दशाया बहु-कालव्यापित्वेन साधकरूपगतान्तदशाया बहुकालव्यापित्वं सामान्यम्. गौणिकस्थानीय साधकरूपस्याऽन्तर्भूतप्राप्तश्रीकृष्णादिसंगव्रजजनानुकारिभावनामय-यथास्थितरूपतयाऽन्तर्भूतयथास्थितरूपाप्राप्तश्रीकृष्णादिसंगव्रजजनानुकारिभावनामयतया द्वैविध्यम्। अस्य भेदद्वयस्यावान्तरत्वात् पूर्णं तन्त्रेण व्याख्यात्रयमित्युक्तम्। अत्र पूर्णमासक्तौ परमासक्तौ भावे च। एतद्द्वैविध्यमन्तर्दशायामपि यथास्थितरूपस्य लोकप्रतीयमानव्यापकत्वभावाभावाख्याम्। व्यापकत्वे प्रतीतिः प्राप्तश्रीकृष्णादिसंगव्रजजनानुकारिभावनामयरूपस्य प्रथमारोपात्। लोकोऽत्रारोपक एव। अतः साधकरूपस्य चातुर्विध्यम्। सिद्धरूपस्यैकविध्यमेव। अत्र सदैवान्तर्दशा पूर्णचातुर्विध्ये क्रमेण वाह्यदशाऽन्तर्वाह्यदशा पूर्णान्तर्दशा परान्तदशा। अत्र पूर्वान्तर्दशेति स्थायित्वात् वाह्यदशायाः प्रातीतिकत्वाच्च। साधकरूपसिद्धरूपगतान्तर्दशयोर्वैलक्षण्यं यथास्थितरूपयोगायोगाभ्याम्, अतः साधकरुपेऽन्तर्दशेति तत्प्राचुर्य्यात् साधकरूपेऽन्तर्दशास्वीकारः। अन्तर्दशां विना रागानुगानुपपत्तेः। अत्र प्रयोगः-साधकरूपे-रागानुगा साधकरूपेण व्रजलोकानुसारित्वात्। साधकरूपेण व्रजजनानुकारिभावनामयरूपस्यारोपः, साधकरूपे रागानुगातः साधकरूपेऽन्तर्दशा साधकरूपे व्रजजनानुकारिभावनामयरूपस्यारोपः अतः प्रथमसाधकरूपे वाह्यदशा तत्प्राचुर्य्यादेव। सिद्धरूपगतान्तर्दशाया बहुकालव्यापित्वस्वरूपोत्कर्षयोः सतोः साधकरूपगतान्तर्दशायास्तौ स्याताम् तटस्थतायास्तु तौ ह्रासं प्राप्नुयाताम् पूर्वस्यास्तौ यथा यथा वर्द्धयतां परस्यास्तौ तथा तथा वर्द्धयताम्, तटस्थायास्तु तौ तथा

तथा ह्रासं प्राप्नुयातां, तयोस्तथा तथा वैलक्षण्यहानिः सालक्षण्य-प्राप्तिश्च भवेत्। अतएव प्रम्णि तटस्थतायाः सम्यङ्निवृत्तिः, तयोः सम्यग्वैलक्षण्यहानिः सम्यक्सालक्षण्यप्राप्तिश्च। अन्तर्दशाया अदर्शनेऽपि तस्याः कार्य्यं तटस्थतायामेतस्या अवहुकालव्यापित्वे स्वरूपापकर्षरूपं तिष्ठति। एवं तटस्थताया अदर्शनेऽपि तस्याः कार्य्यमन्तर्दशायामेतस्या अबहुकालव्यापित्वस्वरूपापकर्षत्वं तिष्ठति। प्रत्ययादर्शने प्रत्ययकार्य्यमिव। साधकत्वहेतुयोग-तटस्थतायामन्तर्दशायास्तत्स्वरूपापकर्षत्वमेव कार्य्यम्। विशेषतः

कामानुगाधिकारिणो लक्षणम्—

"श्रीमूर्त्तेर्माधुरीं वीक्ष्य तत्तल्लीलां निशम्य वा।
तद्भावकाङ्क्षिणो येस्युस्तेषु साधनतानयोः।"

अत्र तत्तल्लीलामिति भावोपलक्षणं तद्भावेति चेष्टितोप-लक्षणम्। अत्रापि तत्तद्भावादिमाधुर्य्ये इत्यादिवद् व्याख्यानुस-न्धेया। सम्बन्धानुगायां कामानुगायामधिकारे जाते सति तावधिकारिणौ प्रति प्रत्येकमुपदेशः, "सेवासाधकरूपेण सिद्धरूपेण चात्र हि। तद्भावलिप्सुना कार्या ब्रजलोकानुसारत" इति। तद्भावेति चेष्टितोपलक्षणं, षड्विधसेवायामपेक्षितत्वात्। उपदिष्ट-साधकरूप–सिद्धरूपक्रियमाण-ब्रजजनविशेषानुसारिव्यतिरेकप्रदर्शन-म्, यत्र रागानवाप्तत्वादित्यादि। "रिरंसां सुष्ठु कुर्व्वन् यो विधिमार्गेण सेवते। केवलेनैव स तदा महिषीत्वमियात्पुरे" इतिच। सर्वथा ब्रजलोकानुसारः, श्रीनन्दनन्दनश्रीरूपगोस्वामि-पादादिकरुणां विना न स्यात्‌यथा—

"कृष्णतद्भक्तकारुण्यलाभमात्रैकहेतुका।
इयं रागानुगा कैश्चित् पुष्टिमार्गतयोच्यते" इति।

आविष्टता-त्रयाभावात्तटस्थं रूपमुच्यते ।

अत्राविष्टता-त्रयं स्वारसिकपरममनोवाक्कायाविष्टतानां मनो वाककायैरनुसारत्रयम् । "कायिकी वाचिकी चैव मानसी चेति या-त्रिधा । सेवा तटस्थरूपेण प्रत्येकं सा पुनस्त्रिधा । स्वपुंस्त्वभावना युक्श्रीकृष्णैश्यभावना युता । भावनाद्वययुक्चेति नैति कामानुगा-ङ्गताम् । प्रथमा त्रिविधा पुंस्त्वभावनेतरसाम्यतः । आनन्तर्य्यात् पोषणाच्च पतेत्कामानुगां प्रति । व्रजभावेतरानर्थनिवृत्त्यादिक-मन्यतः" । स्वपुंस्त्वभावनायुगित्यत्र पुस्त्वप्राधान्यादेव किन्तु यथास्थितदेहमात्रत्वं ज्ञेयम् । एवं सम्बन्धानुगामपि ज्ञेयम् । "यस्य साधकरूपन्तु न तटस्थात् पृथग्भवेत् । तस्य साधकरूपं स्थात्तटस्थं रूपमेव हि । रसनायां यथा वस्तु विशेषद्वयमिश्रिता । एवमेकार्थनिष्पत्तेः सिद्धसाधकरूपयोः ।। संश्लेषो हि यथा वस्तु विशेषद्वयपात्रयोः । एवं तटस्थरूपस्य सिद्धरूपस्य सम्मतः । तट-स्थेनापि रूपेण न कुर्य्यात् कर्म्म कुत्रचित् । मदिरासदृशं तद्धि सान्निध्यात्तस्य दोषभाक्" सिद्धरूपस्य भावनामयत्वात् तत्र रागानुगैव न तु रागात्मिका । साधकरूपे तु रागानुगा तत्र भावनामयरूपस्यारोपादेव । तटस्थरूपेण रागानुगा तत्र भावनामयरुपस्यारोपाभावात् । तटस्थतायामपि रागानुगा फलरुपा निष्ठादयो न वियन्ति यथा साधनविरामेऽपि तत्फलरूपः प्रेमा न व्येति । साधकरूपे यदा निष्ठादय उदयं प्राप्नुवन्ति तदा सिद्धरूपे ते उदयं प्राप्नुवन्ति तत्तु वीणा- वैणिकदृष्टान्तेन दर्शितमेव । साधकरूपे प्रेम्नि जाते सति भावनामयरूपमेव जात प्रेम सत् साक्षाद्रूपं भवति । साधकरूपमपि सिद्धं सत् साक्षाद्रूपेण सहैक्यं प्राप्नोति तदा तत्र तत्र रागात्मिका । श्रीगुर्वादीनान्तु सिद्धरूपे साधकायमानरूपे च रागात्मिकैव न तु रागानुगा, यथा

श्रीरूपगोस्वामिपादादीनां तेषां साधकरूपे साधकायमानत्वात्। स्वस्य सिद्धरूपे सिद्धायमानत्वात् ते सिद्धाः स्वयं साधकाः अनेन भावनामयरूपस्य सत्यत्वमायातम्। न तन्मयमनामयस्येव मिथ्यात्वं, अन्यथा तत्कृतसाधनस्य मिथ्यात्वापत्तेः किन्तु व्यतिरेकप्रदर्शनगतभावनामयस्यासत्यत्वेऽपि फलान्तरप्राप्त-कत्वम्। भावनामयपक्षस्य मयट्प्रत्ययार्थस्यावास्तवत्वेऽपि भावनारूपप्रकृत्यर्थस्य सत्यत्वेन तत्कृतस्मरणमाहात्म्यात्। यदा श्रीकृष्णतद्भक्तकारुण्यलाभेन मनोवाक्कायैः सर्व्वथा व्रजलोकानुसारो जायते तदैव श्रीव्रजेन्द्रनन्दनेन दिव्यसर्गादिकर्त्तृत्वरूपा-चिन्त्यशक्त्या सापेक्षणीयभावनामयरूपं निर्म्मीयेतत् किन्तु भावनामयरूपेण श्रीव्रजे स्थितिः श्रीव्रजलोकसंगश्च श्रीव्रजेन्द्रनन्दनसेवा च श्रीनन्दनन्दनदुर्घटघटनरूपाचिन्त्यशक्त्या संपद्यते। सापेक्षणीयभावनामयजनभावनामयरूपे साक्षाद्रूपे जाते सति श्रीनन्दनन्दनव्रजजनैः सहोत्पत्तिकसम्बन्धोऽपि श्रीनन्दनन्दनदुर्घटघटनारूपाचिन्त्यशक्तिविलासः, भावनामय-रूपस्य सत्यत्वं मानसेनोपचारेणेत्यादिपदद्यस्य टीकायां द्रष्टव्याम्। यथा कदाचिन्मनसैव घृतसहितं परमान्न निर्म्माय सौवर्णपात्रेण तद्भोजनार्थमुत्थाप्य स्थितस्तत्तप्ततया स्फुरिते तस्मिन् प्रविष्टम-ङ्गुलियुगलं दग्धं प्रतियन् हन्त तदिदं दुष्टं जातमिति दुःखेन तद्धित्वा समाधिभङ्गेऽपि जाते दग्धाङ्गुष्ठतया बहिरपि पीड़ितो वभूवेत्यत्र स्फुरित इति प्रतियन्निति गृहीतसघृतपरमान्नपात्रस्य तद्धृतसौवर्णपात्रस्थितसघृतपरमान्नस्य भावनामयत्वमायातम्। दग्धाङ्गुष्ठतया वहिः पीड़ितो वभूवेति भावनामयस्यैतस्य सत्यत्वमायातम्, अन्यथा परमान्नतप्ततयाङ्गुष्ठदग्धत्वस्यासम्भ-वात्। वहिर्दग्धाङ्गुष्ठतया पीड़ितत्वेन सिद्धसाधकदेहयोः रसनायां

वस्तुद्वयस्येव मिश्रिता याता। अतएवसिद्धरूपेण यत्करोति तत् साधकरूपे प्रचरति साधकरूपेण यत्करोति तत् सिद्धरूपे प्रचरति, तस्मात् सिद्धसाधकरूपाख्यो ब्रजलोकानुसार एव मनो वाक्कायैः कर्त्तव्य इति । अत्र प्रयोगः–भावनामयं तप्तं परमान्नं रूपञ्च सत्यं दग्धाङ्गुष्ठतया वहिः पीड़ायाः सत्यत्वात् । अतः सिद्धरूपस्य भावनामयत्वेऽपि व्यूहत्वं, अहन्तास्पदस्यात्मन ऐक्यविध्यात् । ममतास्पदस्य देहरूपस्य साधकरुपत्वमिद्धरुपत्वाभ्यां द्वैविध्याच्च । तदा तटस्थरूपस्य न व्यूहत्वं, तस्मिन्ममतास्पदत्वस्य वाधितत्वात्, "हर्षनिष्ठादिकं सर्व्वं सिद्धरूपगतं हि तत् । पतेत् साधकरूपेऽनुभवितेको यतस्तयोः । वीणावैणिकतुल्यत्वं नातः सर्वांशतस्तयोः । व्यूहत्वाभावभावाख्या महती सिद्धरूपयोः" ॥ अतएव क्वचित् सिद्धरूपगतान्तर्दशानन्तरा साधकरूपगतान्तर्दशा साधकरूपगतान्तर्दशानन्तरा साधकरूपगतान्तर्दशा साधकरूपगतान्तर्दशानन्तरा तटस्थता क्वचित् सिद्धरूपगतान्तर्दशानन्तरा साधकरुपगतान्तर्दशा पुनस्तदनन्तरा सिद्धरूपगतान्तर्दशा इति । ब्रजलोकाः श्रीमद्रूपगोस्वामिपादादयः । तदनुसारतः साधकरूपेण सेवा कार्य्येति तन्त्रेण व्याख्यान्तरमन्यत् समम् । अतः श्रीगुर्व्वादीनां साधकायमानरूपस्यानुसारः साधकरूपेण कर्त्तव्यो नतु तटस्थायमानरूपस्य । श्रीरूपमञ्जर्य्यादिषु कामरूपा भक्तिर्नतु सम्भ्रमप्रीतिरूपा । यथा मुक्ताचरिते:— "स्वाभिलषितपरिचरणविशेषलाभाय च रंगणमालाप्रभृतय एताः परमप्रणयिसख्योऽपि परिचारिका इव व्यवहरन्तीति" । अत्र रंगणमाला रंगणवल्लीति श्रीरूपमञ्जर्य्याः द्वे नामनी ज्ञेये । श्रीगोविन्दलीलामृते:—

"आश्चर्य्यं हरिणा राधा गाढ़मालिङ्गिता चिरम् ।
तदसंगतियुक्ताऽपि निवृतासीत् सखीततिरिति" ।

वृन्दाप्रश्नानन्तरं नान्दिमुख्या उत्तरम्—

"सख्यः श्रीराधिकायाः व्रजकुमुदविधोर्ह्लादिनीनामशक्तेः
सारांशप्रेमवल्ल्याः किशलयदलपुष्पादितुल्याः स्वतुल्याः ।
सिक्तायां कृष्णलीलामृतरसनिचयैरुल्लसन्त्याममुष्याम्
जातोल्लासाः स्वसेकाच्छतगुणमधिकं सन्ति यत्तन्न चित्रमिति"॥

श्रीरूपमञ्जर्य्यायाः सदा भावोल्लासान्वयाः ।
"मदीशानाथत्वे व्रजविपिनचन्द्रं व्रजवनेश्वरीं तां नाथात्व"
इति वचनात् । भावोल्लासस्य लक्षणम् —

"सञ्चारी स्यात् समोना वा कृष्णरत्याः सुहृद्रतिः ।
अधिका पुष्यमाणा चेद्भावोल्लास इतीर्य्यते ॥"इति ।

सञ्चारीति श्रीकृष्णरतिमूलकत्वात्, तच्च श्रीकृष्णरतेः स्वपक्षत्वादिहेतुत्वात् । अत्र भावोल्लासः स्थायीविशेषः, किन्तु श्रीकृष्णरतेः परार्थत्वाभावान्नाङ्गत्वं तद्विषयरसस्याङ्गित्वमेव । अतएव भावोल्लासस्थायिकः श्रीराधिकाविषयरसोऽङ्गिमेव नतु हास्यादिवदङ्गी । हास्यादौ रतेः परार्थत्वात् । अत्र प्रयोगः श्रीकृष्णरत्याः पुष्यमाणात्ततोऽधिकापि सुहृद्रतिस्ततो नाधिका श्रीकृष्णरतेः समाया अपि सुहृद्रतेस्तस्या व्यभिचारित्वात् । अथोदाहरणदिग्दर्शनम्—

"श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम् ।
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयास—
स्तद्वद्वयं च तव पादरजः प्रपन्नाः ॥"

इत्यस्य पदचस्य प्रेमकृतोत्कर्षदृष्टिप्राप्तार्थमात्रानुसन्धानेन, मनोवाक्कायैः मञ्जर्य्यादिपूर्वावस्थापरावस्थयोरनुसारेण साधक-

रूपेण सिद्धरूपेण च कामानुगायां सेवा षड्विधा भवति। प्रत्येकं ज्ञानप्राप्तार्थमात्रानु-सन्धानेन सा षड्विधा, प्रतीयमाने मञ्जर्य्या-दयनुसारेऽप्यजातप्रेमतया साधकत्वे वैध्येव भवति। "यथा वादका-चित्तस्था गीतिस्तन्मुखनिःसृता। तत्कर्त्तृसंगता वीणासम्भवा युगपद् भवेत्। एवं साधकचित्तस्था सेवा तन्मुखनिःसृता। तत्कर्त्तृसंगता सिद्धरूपचित्तादिसम्भवा"। तत्र ज्ञानप्राप्तार्थः स्पष्टः प्रेमोत्कर्षदृष्टिप्राप्तार्थो यथा—यत्पदाम्बुजरजः यस्य नारायणस्य पदाम्बुजरजः श्रीश्चकमे तद्वत्तवेति "तस्मान्नदा-त्मजोऽयं ते नारायणसमो गुणैरि'त्युक्तत्वात् स इव यस्त्वं तस्य तव पादरजो वयं प्रपन्ना इति। यथास्थितदेहेणार्थद्वया-स्वादनं तटस्थरूपेण, तत्तु मानसवाचिककायिकतया प्रत्येकं त्रिधा, स्त्वपुंस्त्वभावनायोगायोगाभ्यां पुनस्तत्प्रत्येकं द्विधा, अत्र स्वपुंस्त्वभावनां विना यथास्थितरूपेण मनोवाक्कायैस्त्रिविधपरा-र्थस्वादनं कैमुत्येन कामानुगां प्रत्यापतेदिति। तत्त्रिविधभेदास्वी-काराद्भेदानां द्वादशत्वेऽपि नवत्वमिति। श्रीमहाप्रभोर्भाववर्णौ श्रीराधिकाभाववर्णाभ्यांसहैकीकृत्य तस्य स्वरूपं श्रीनन्दनन्दनस्व-रूपेनैकीकृत्योक्तलक्षणसाधकरूपोपयुक्तदशायां तत्तदेकीकरणानु-सन्धानवलितं तस्य लीलास्वादनमुक्तलक्षणसाधकरूपेण तस्मिन् ास्वादनेऽऽवेशातिशयादन्तर्दशायां सत्यां तत्तदेकीकरणानुसन्धान-रहितं तत् श्रीकृष्णलीलास्वादनगतभावनामय-सिद्धरूपेण। अत्र तटस्थस्वरूपं नास्त्येव। "शचीसूनुं नन्दीश्वरपति-सुतत्वे" इति नन्दनन्दनस्यैव विधेयत्वात्। यथा श्रीनन्दनन्दनस्य प्रकाशद्वैविध्याभावेऽपि श्रीगौरविधुत्वम्। एवं श्रीरूप-मञ्जर्य्यादीनां प्रकाशद्वैविध्याभावेऽपि श्रीमद्रूपगोस्वा-म्यादित्वम्। एवमन्यमञ्जर्य्यादीनां प्रकाशद्वैवध्याभावेऽपि श्रीमद्रु-पगोस्वाम्यादयनुगतत्वम्। अतएव श्रीगुर्व्वादीनां प्रकाशद्वैविध्या-

भावेऽपि श्रीरूपगोस्वाम्यादीनामनुगततया सङ्गित्वम्। अतएव श्रीनन्दनन्दनादीनां श्रीगौरविध्वादीनांचप्राप्तिः समकाला समरूपा च। अत्र प्रकाशद्वैविध्याभावस्वीकारः प्रकाशपरमवैशिष्ट्यापेक्षया। साच सर्वथा भेदाभावापेक्षया, प्रकाशधामपरिकरसमयलीलादिगतभेदानां मध्ये भेदस्यैकतरस्य स्वीकारः अत्र तु तेषां मध्ये तस्यैकतरस्याप्यस्वीकार इति। परमवैशिष्ट्यं स च सर्वेषां तेषां युगपत्प्रकाशस्वीकाराय प्रकाशस्याचिन्त्यत्वम्। प्रकाशद्वैविध्याभावेऽपि श्रीगौरविधुत्वादिकस्यैतस्याचिन्त्याचिन्त्यत्वं तच्च कलियुगपावनत्वादिना परमकारुण्याधिक्येऽपि प्राकट्ये हेतुत्रयसद्भावेन श्रीराधिकाभाववर्णस्वीकारपरमसत्तायामपि अतएव तदुभयमिश्रणेन सितामिश्रणेन घनावर्त्त पयस इव लीलाया माधुर्य्यवैशिष्ट्येऽपि सिद्धरूप-साधकरूपगतकामानुगायास्तदुभयपृथक्भावेसतिसाधकरूपगतायास्तस्यास्तदुभयदीप्तत्वेऽप समयादिभेदाभावादिति॥ वैधी—भक्त—साधकरूपाचरणं तत्सालक्षण्य—प्रतीयमा—नरागानुगा--भक्त--तटस्थरूपाचरणयोर्वैलक्षण्यं ब्रजलोकानुसारं विना शास्त्रशासनेन लोभेन वा स्वाभीष्टसाधकत्वेन तटस्थरूपसाहित्याभावेन च यत् क्रियते तत् पूर्व्वम्, ब्रजलोकानुसारं विना शास्त्रशासनलोभौ च विना स्वाभीष्टासाधकत्वेन साधकरूपसाहित्याभावेन च यत् क्रियते तत् परम्। शास्त्रस्य शासनेनैवेत्यवकारो ब्रजलोकानुसारं विना लोभस्य शास्त्रशासने प्रवर्त्तकत्वात्। शास्त्रशासनब्रजलोकानुसारानपेक्षाचरणस्यामार्गत्वाच्च। वैधी-रागानुगा च मार्गौ। "लोभेन कर्माचरणेन तद्भक्तिर्यथा भवेत्"। लोभेन वैध्याचरणे न सा रागानुगा तथेति। आवेशं मानसं ब्रूते वाचिककायिको हि सः। यथा वैणिकचित्तस्थां गीतिं वीणाभवा हि सा। अतो मानस आवेशे

साधकत्वमबाधितम् । अयोगेऽपि हि सान्निध्यमुत्तमाधमयोर्मिथः । स्वकार्य्योत्पाद्यवश्यं स्यात् सिद्धरूपतटस्थयोः" । अत्र प्रयोगः- अयोगेऽपि तटस्थता स्वकार्य्योत्पादिका सिद्धरूपगतान्तर्दशा परिच्छेददशान्तत्वाच्च अयोगेऽपि सिद्धरूपगान्तर्दशा स्वकार्योत्पादिका तटस्थतायाः परिच्छेदादेः । सिद्धरूपस्य न यथास्थितदेहयोगः व्यतिरेकसिद्धत्वेनारोपाभावात् । यथास्थितदेहविषयाभिमानस्य लीनत्वे सति सिद्धरूपगतसेवोदयाच्च । "यद् योगात्साधकं रूपं ताटस्थ्यं सूक्ष्ममेव तत् । लिङ्गं जीवमिवाभावं तज्जहाति न तत् क्वचित् । बन्दे श्रीकृष्णप्रेमाणं यस्योद्गमनमात्रतः । ताटस्थ्यं निधनं याति तमस्सूर्योदये यथेति"। तन्त्रेण व्याख्यान्तरम्— प्राप्तश्रीकृष्णादिसंगव्रजजनानुकारिभावनामयरूपस्य यथास्थितदेहयोगायोगाभ्यां साधकरूपत्वसिद्धरूपत्वे उभाभ्यां सेवा द्विधा पूर्वा परेति । साधकरूपगतवाह्यान्तवाह्याद्धवाह्यदशयोः पूर्वा । साधकरूपगतान्तर्दशायां परा । पूर्वा समरूपाप्यसमकाला परा समकाला च । पूर्वस्यां भावनामयरूपस्य यथास्थितदेहेऽन्तर्भूतत्वम् । पूर्वे द्वितीयव्याख्यायां साधकरूपेण सेवायां यथास्थितदेहस्य भावनामयरूपेऽन्तर्भूतत्वमत्र तु भावनामयरूपस्य यथास्थितदेहेऽन्तर्भूतत्वमिति वैलक्षण्यमत्र साधकरूपासिद्धरूपगतसेवयोः समरूपत्वात् झटिति सिद्धरूपगतसेवापातेन साधकरूपगतसेवायाः प्रावल्यभावेनार्द्धवाह्यदशायाः स्थायित्वेऽप्यारोपे वाह्यदश-सद्भावात् । परस्यां यथास्थितदेहस्य भावनामयरूपेऽन्तभूतत्वम्,परस्यामेव साधकरूपसिद्धरूपयोर्वेणिवयवीणातुल्यत्वमिति । अत्र विवक्षितसाधनांशनोपादे तत् पूर्वं न दर्शितमिति । अत्र सिद्धसाधकरूपगतरागानुगा त्रिधा दर्शिता । लोभमारभ्यारुचि वाह्यार्द्ध वाह्यदशयोरसमरूपाऽसमकाला चाशक्तिमारभ्याभावमन्तर्दशायां समरूपा समकाला चेत्यन्या । लोभमारभ्याभावं वाह्यार्द्ध वाह्यदशान्तर्दशा स्वसमकाला समरूपा चेत्यन्या ।

सिद्धसाधकरूपयोरत्र वीणा-वैणिकतुल्यत्वं नास्ति। लोभमारभ्यार्चि वाह्याद्धवाह्यदशयोः समरूपाप्यसमकाला चाशक्तिमारभ्याभावान्तदर्शायां समरूपा समकाला चेत्यन्येति। समञ्जसानुरागा वैधीकामानुगातोऽभिन्नतया रागानवाप्तत्वेन "पतिरेव गुरुः स्त्रीणामि"त्यादि समञ्जसागतशास्त्रशासनप्रवृत्त्या "यत्र रागानवाप्तत्वात् प्रवृत्तिरुपजायते। शासनेनैव शास्त्रस्य सा वैधी भक्तिरुच्यते" इत्युक्तवैधीलक्षणव्याप्तेः समञ्जसानुगायाः कामानुगातोऽभिन्नता। "सा कामरूपा सम्भोगतृष्णां या नयति स्वताम्। यदस्यां कृष्णसौख्यार्थमेव केवलमुद्यमा" इत्युक्तलक्षणकामरूपायाः समर्थापरपर्य्यायित्वात्। तच्च "किञ्चिद्विशेषमायान्त्या सम्भोगेच्छा ययाभितः। रत्या तादात्म्यमापन्ना सा समर्थेतिभण्यते। सर्वाद्भुतविलासोर्म्मि-चमत्कारकरश्रियः। सम्भोगेच्छाविशषोऽस्या रतेर्जातु न भिद्यते" इत्युक्तलक्षणसमर्थाशालक्षण्यादिति। "श्रीनरोत्तमपादाब्जं स्फुरतां हृदि मे सदा। तच्छ्रीधुमत्तक्षुद्भृङ्गैर्जनैसंगोऽस्तु मेऽनिशम्" इति रागानुगाविवृतौ पूर्व्वार्द्धम्॥

मनोवाक् कायसम्बन्धात् सेवैकैव त्रिधा भवेत्।
मानसी वाचिकी चैव कायिकीति विचारतः॥

यथा साधकरूपेण मानसी वाचिकी कायिकीति त्रिधा सेवा—

"कदा विम्बोष्ठि! ताम्बूलं मया तव मुखाम्बुजे।
अर्प्यमाणं व्रजाधीशसूनुराच्छिद्य भोक्ष्यते॥"

सिद्धरूपेण मानसी वाचिकी कायिकीति त्रिधा सेवा यथा—

"याते कञ्चुलिरत्र सुन्दरि! मया वक्षजयोरर्पिता
श्यामाच्छादनकाम्यया किल न साऽसत्येति विज्ञायताम्।
किन्तु स्वामिनि कृष्ण एव सहसा तत्तामवाप्य स्वयं
प्राणेभ्योऽप्यधिकं स्वकं निधियुगं संगोपयत्येव हि"॥

तटस्थरूपेण स्वपुंस्त्वभावनाया योगेन मानसी वाचिकी कायिकीति त्रिधा सेवा यथा—

"विचित्रपत्राङ्कुरशालिबाला-स्तनान्तरं यामि वनान्तरं वा ।
अपास्य वृन्दावनपादलास्यमुपास्यमन्यन्न विलोकयामि" ।

तटस्थरूपेण स्वपुंस्त्वभावनाया अयोगेन मानसी वाचिकी कायकीति त्रिधा सेवा यथा—

"यया बृन्दावने जन्तुरनर्होऽप्येष वास्यते ।
तयैव कृपया नाथौ सिद्धिं कुरुतमीप्सितम् ।।"

तटस्थरूपेण श्रीकृष्णे ऐश्यभावनाया योगेन मानसी वाचिकी कायिकीति त्रिधा सेवा यथा—

"वैकुण्ठादपि सोदरात्मजवृता द्वारावती सा प्रिया
यत्र श्रीशतनिन्दि-पट्टमहिषीबृन्दैः प्रभुः खेलति ।
प्रेमक्षेत्रमसौ ततोऽपि मथुरा श्रेष्ठा हरेर्जन्मतो
यत्र श्रीब्रज एव राजतितरां तामेव नित्यं भजे" ।।

तटस्थरूपेण स्वपुंस्त्वभावना-श्रीकृष्णैश्यभावनायोगेन मानसी वाचिकी कायिकीति त्रिधा सेवा यथा—

"प्रपद्य भवदीयतां कलितनिर्म्मलप्रेमभि-
र्महद्भिरपि काम्यते किमपि यत्र तार्णं जनुः ।
कृतात्र कुजनैरपि ब्रजवने स्थितिर्मे यथा
कृपां कृपणगामिनीं सदसि नौमि तामेव वाम्" ।।

ऐश्यभावनया पूर्वा वैध्य-सेवा मता हि षट् ।
इष्टसम्पादकत्वेन कृता वैध्या द्विषट् पराः ।।
आस्वष्टादशवैधीषु त्रिकषट्क विचार्य्यते ।
त्रिकाणां तृतीयादीनामेकेनापि मधोः पुरीम् ।।

आख्या-द्वितीययोरेकतरेण द्वारकामियात् ।
त्रिकयोः शवलेनापि किं तृतीयादिभिः पुनः ॥
मिश्रितेन त्रिकैः कृष्णवैकुण्ठं केवलात्तु तैः ।
किं पुनर्मिश्रितादौ तु द्वितीयाद्यत्रिकद्वयात् ॥
लोकापेक्षा-कृतं यत्तच्छास्त्रशासनमलकम् ।
यदशास्त्रीयकृद्लोकापेक्षा नैव प्रजायते ॥
अभावं साधकत्वेन व्यूहत्वं रूपयोर्द्वयोः ।
जाते प्रेम्नि प्रकाशत्वं सिद्धत्वेन तयोर्भवेत् ॥
भावनामयरूपस्य द्विधा योगो निगद्यते ।
यथास्थिततेन देहेन तत्स्फूर्त्यारोपयुग्मतः ।
यथास्थिततस्य देहस्य स्फूर्त्तावसमरूपयोः ॥
वाधितं साधकं रूपं नहि स्यात् सेवयोः क्वचित् ।
आरोपे चेद्वाह्यदशा तदा स्फूर्त्तौ दशात्रयम् ।
आरोपेऽर्द्धवाह्यदशा चेत्तदादि द्वयं तदा ॥
स्फूर्त्तावन्तर्दशारोपे चेत् स्फूर्त्तौ सैव स्यात्तदा ।
स्फूर्त्तिः स्यात् सिद्धरूपेण प्रवृत्तावपि सेवने ॥
आरोपे या दशा यस्य स्थायिनी तस्य सा दशा ।
प्रातिलोम्येन विज्ञेया हेतोः पातात्तटस्थता ।"

स्थायिदशा-तटस्थतयोर्मध्ये अन्यदशासद्भावेऽपि लाघवान्न तद्विवक्षा। वाह्यार्द्धवाह्यदशयोरवान्तरभेदसद्भावेऽपि न तद्विवक्षा प्रसिद्धाभावात् ।

"सिद्धरूपकृतासेवा मानस्यां तदभावतः ।
आश्रयस्या विनाभावात् सेवायां साधके पतेत् ॥
रूपे चन्द्रादिवद्दर्घ्न द्वारकादिपदप्रदा ।
सर्वथा व्रजलोकानुसारस्य व्यतिरेकतः ॥" इति ॥

अवस्था-देहादिकं भावनामयं सर्वं मिथ्याभूतम्, जीवस्य तस्मिन्नध्यासो नास्ति यथान्यस्यावस्था देहादिके। अतोऽभिमानोऽपि तस्मिन्नास्ति यथान्यस्यावस्था देहादिके। यदि भावनामयी अवस्था सत्या तदा भावनामयदेहः कथं न सत्यः। यदि भावनामय्यामवस्थायामध्यासोऽभिमानश्च जायते तदा भावनामये देहे स च कथं न जायेत। यदि स्वप्नमनोरथयोर्मनोमयेऽपि देहे आवेशजाभिमान इव भावमय्यामवस्थायामावेशजाभिमानो जायेत तदा स एव भावनामयदेहे कथं न जायेत। यदि भावनामय्या अवस्थायाः सत्यत्वेनात्मान्वयस्तदा भावनामयदेहस्यापि कथं न तेन तदन्वयः इति। स्वपुंस्त्वभावनायोगायोगाभ्यां तटस्थरूपेण पूर्वाया षड्विधा सेवा, तया सिद्धरूपेऽभिमानस्योत्कर्षं साध्यते। तटस्थरूपेण पराया षड्विधा सेवा, तया यथास्थितदेहे बाधिताभिमानस्य नाशः साध्यते। पूर्वाभिमानश्चिच्छक्तिवृत्तिरूपः परोऽभिमानो मायावृत्तिरूपः पूर्वस्य साध्यत्वात् परस्य नाश्यत्वात्। अतश्च साधूक्तं पतेत् कामानुगां प्रतीति। व्रजभावेनरानर्थनिवृत्त्यादिकमन्यत् इति च। अत्र प्रयोगः-सिद्धरूपमात्मवत् त्रिविध-सेवा सम्पादितत्वात्। सिद्धसाधकगत आत्मा एकः, सिद्धरूपगतहर्षादेः साधकरूपे उदयात्। अभिमानः सिद्धसाधकरूपगत एकः, आत्मनस्तदुभयान्वयात्। "आरोपे साधके रूपे सिद्धरूपगतस्य हि। अभिमानस्य विज्ञेयः प्रकाशो न भिदा ततः। चातुष्पादिकता तस्याऽन्यथात्वेन न सिध्यते"॥ अथ तटस्थरूपगतविचारः—

"आत्मा देहात् पृथग्भूतो वृक्षात् पक्षी यथा भवेत्।
अभावमभिमानोऽस्मिन् बाधितोप्यात्मनो भवेत्।
सोऽस्या स्फूर्त्तौ प्रलीनः स्यात् स्फूर्त्तावुद्बुद्धतां व्रजेत्।
अभिमानोऽत्र यावत् स्याद्देहोऽयं तावदात्मनः।
तस्मादनेन देहेन नान्यत् कुर्य्यात् कदाचन।

रागानुगा पोषका द्वे सिद्धान्तकथनादित" इति। ताटस्थ्यं द्विधा स्थूलं सूक्ष्ममिति। तद्द्विविधं पुनः प्रत्येकं त्रिधा। वृहन्मध्यमलघ्विति। वाह्यदशायां साधकरूपे सूक्ष्मं ताटस्थ्यं वृहत्, तटस्थरूपे स्थूलं ताटस्थ्य वृहत्। अन्तर्वाह्यदशायां साधकरूपे सूक्ष्मं ताटस्थ्यं मध्यमं तटस्थरूपे स्थूलं ताटस्थ्यं मध्यमं, अन्तर्दशायां सूक्ष्मं साधकरूपे तटस्थरूपे स्थूलं ताटस्थ्यं लघु। अभिमानस्त्रिधा वृहन्मध्यमो लघुरिति। वाह्य-दशायां सत्यां सिद्धरूपेऽभिमानो लघुः, तटस्थरूपेऽभिमानो वृहत्, अर्द्धबाह्यदशायां सिद्धरूपेऽभिमानो मध्यमः, तटस्टरूपेऽभिमानो मध्यमः;अन्तर्दशायां सिद्धरूपेऽभिमानो वृहत्, तटस्थरूपेऽभिमानो लघुः, केवलान्तर्दशायां सिद्धरूपेऽभिमानोऽतिवृहत्। एवं साधक-रूपेऽभिमानश्चिच्छक्तिवृत्तिरूपः स च वाह्यदशादिषु सिद्धरूप इव लघ्वादिरूपः। केवलबाह्यदशायां यथास्थितदेहेऽभिमानोऽति-वृहत्। स्थायिना दशा चेत् कनिष्ठा तदान्या दशा कनिष्ठा, स्थायिनी दशा चेन्मध्यमा तदान्या दशा मध्यमा, स्थायिनी चेदुत्तमा तदान्या दशोत्तमा। अभिमानयोः प्राकृतत्वाप्राकृतत्वा-भ्यां तटस्थरूपस्य साधकरूपं नावस्था किन्तु देहान्तरम्। "यथा काञ्चनतां याति कांस्यं रसविधानतः। तथा दिक्षाविधानेन द्विजत्वं जायते नृणामि"ति वचनाद्वैष्णवमन्त्रग्रहणेन देहा-न्तरं स्यान्नतु पूर्वदेहस्य मृदो घट इव देहस्य बाल्यादिरिवा-वस्था। अन्यथा वर्णाश्रमसत्वेन तत्तद्धर्माधिकारादतएव तदकरणे प्रत्यवायापाताच्च। यथा साधकरूपेण क्रियमाणा 'सेवा अन्यैर्जनै-र्यथास्थितदेहेन क्रियमाणा प्रतीयते तथा वर्णाश्रम--रहितेन देहेन क्रियमाणा सेवा अन्यैर्जनैर्वर्णाश्रमवता देहेन क्रियमाणा प्रतीयत इति

साधकरूप-यथास्थितदेहयोर्द्वयोरप्यन्वयसिद्धत्वं, यथा लोभ-सद्भावेनाधिकारित्वसत्वेऽपि भावनामय— देहारोपापगमात्

साधकरूपं पुनस्तटस्थतया पुनर्देहान्तरतां प्राप्नोति, तथा श्रद्धा सद्भावेनाधिकारित्वसत्वेऽपि पुनर्वर्णाश्रमधर्माचरणाद् गृहीत-भगवन्मन्त्रादिरपि देहः पुनर्देहान्तरतां प्राप्नोति अतएव साधक-रूपतचिरादि पृथाक् यथैकादशे-

"गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ।
जीवस्य देह उभयं गुणाश्चेतो मदात्मनः ॥
गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ।
गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेदि"त्यत्र

चित्तादेस्त्याज्यत्वेन वर्णितत्वाच्च ॥

शास्त्रीयं कर्म शास्त्रीया वैधी रागानुगा तथा। कर्माधिकारी शास्त्रीय कर्त्ता, तत्करणे यथा । वैधभक्त्यधिकारी तत् कृतौ शास्त्रीयकृद्-यथा। रागानुगाधिकारी तत् कृतौ शास्त्रीयकृत्तथा"॥ रागानुगाया प्रभेदरूपत्वात् सम्बन्धानुगाकामानुगे शास्त्रीये । यथा सम्वन्धानुगा अकरणे कामानुगा-भक्तोऽशास्त्रीयकृन्न भवति, यथा कामानुगाया अकरणे सम्बन्धानुगाभक्तोऽशास्त्रीयकृन्न भवति, तथा वैधभक्त्यकरणे रागानुगाभक्तोऽशास्त्रीयकृन्न भवति । अतएव अपि त्यक्त्वा लक्ष्मीपतिरतिमितो व्योमनयनीमि"ति अधिकारी न लुब्धश्चेद्भक्ति रागानुगा भवेत् । "भक्ति रागानुगा न स्यात् लुब्धश्चेदधिकारवान् । व्रजभावस्तदा न स्यात्तद्द्वये सति स्यात् स हि" ॥ अतएव स्वे स्वेऽधिकार इत्यादि रागानुगायाः शास्त्रीयत्वं शास्त्रीयायास्त्रि-विधाया भक्तेः प्रभेदरूपायाः साधनभक्तेः प्रभेदरूपत्वात् ।

"लक्षणाव्यतिरेकेण वैधभक्त्यधिकारिणः ॥
लोभः साधनगो रागानुगाधिकारिणो भवेत् ।
भावनामयरूपस्यारोपेणाक्षिप्यते बलात् ॥
देशकालादिगारोपः स्वसिद्धयर्थं सुनिश्चितम् ।

भावनामयरूपेणारोप्यमाणेन मानसी ।
सेवाया क्रियते तस्यां कुण्डवासादि सिद्धयति ।
प्रेमवाह्यदशा सिद्धरूपे या स्थायिनी नहि ।
जाते प्रेम्नि स्थायिनी, सा केवलान्तर्दशा मता ।"

यथा प्रीतादि--रसेऽन्यरसानुभावसाधारणा अनुभावाः स्थायिवैशिष्ट्यं ज्ञापकाः सन्तः स्ववैशिष्ट्यं. ज्ञापयन्ति अन्यथा तेषामनुभावत्वं न सिध्यति । एवं "श्रवणोत्कीर्त्तनादीनि वैधभक्त्युदितानि तु । यान्यङ्गानि च तान्यत्र विज्ञेयानि मनीषिभि" रित्यत्र श्रवणोत्कीर्त्तनादीनि रागानुगात्वरूपवैशिष्ट्यं ज्ञापकानि सन्ति स्ववैशिष्ट्यं ज्ञापयन्ति । अन्यथा तेषां रागानुगाङ्गिता न सिध्यति । रागानुगागतश्रवणोत्कीर्त्तनादिषु तेषां वैधभक्तिगतश्रवणोत्कीर्त्तनादीनां साधारण्यं यान्यधिकारिणोऽलुब्धत्वेन वैधभक्त्युदितानि तु । कर्मवैधभक्तिव्यतिरेकसिद्धं न । यथा मन्त्रतस्तन्त्रत इत्यादि । वैधभक्तिः व्यतिरेकसिद्धा यथा तावत् कर्म्माणीत्यादि । वैधभक्तिर्न रागानुगाव्यतिरेकसिद्धा यथा "श्रवणोत्कीर्त्तनादीनि वैधभक्त्युदितानि"त्वत्यादि । एतत्तु "यत्र रागानवाप्तत्वादित्यादेः" । अत्र यत्रेति सामान्यतया निर्देशो वैधभक्तेः रागानुगाव्यतिरेकासिद्धत्वात् । रागनुगाव्यतिरेकसिद्धा यथा-सेवासाधकरूपेणेत्यदि । एतत्तु "रागात्मिकामनुसृते"त्यादेः। अत्र रागात्मिकामनुसृतेति विशेषतया निर्देशो रागानुगायाः वैधीभक्तिव्यतिरेकसिद्धत्वात् । तच्च सामान्यनिर्देशतो विशेषनिर्देशस्य बलवत्वात् । रागानुगायाः "यत्र प्रवृत्तिर्लोभेन भक्तिरागानुगा लक्षणा चेदभविष्यत्तदा वैधभक्तिव्यतिरेकसिद्धा हि सेत्येवं" नाभविष्यदिति ।

"श्रुत्या चात्रानुमानेन यत् प्रत्यक्षं विरुध्यते ।
ऐतिह्यञ्च क्वचित्तत्र भावो ज्ञेयः सुबुद्धिभिः ।

पुराणे श्रूयते पाद्मे कश्चित् कुरुपुरीस्थितः।
नन्दसूनोरधिष्ठानं तत्र पुत्रतया भजन्।

नारदस्योपदेशेन सिद्धोऽभूद्वृद्धवर्द्धकि' रित्यत्र तत्रेति नन्दसूनोरधिष्ठानमिति च साधकरूपमायातम्, पुत्रतयेति तत्र वर्द्धकौ श्रीव्रजेश्वर्य्या भावानुकरणमायातम्, भजन्निति तत्र व्रजेश्वर्य्याश्चेष्टानुकरणमायातम्। आद्यां तत्र वर्द्धकित्वानुपयुक्तत्वाद्गोपजातित्वारोप आक्षिप्यते। अनेन पूर्वास्यां च तत्र भावनामय्याः श्रीव्रजेश्वर्य्या अनुरागायागुणादेहारोप आक्षिप्यते। भाव-क्रिया-जाति--गुण-द्रव्यानुकरणानां परस्परसापेक्षत्वात्। नारदस्योपदेशेनेति अस्य नारदस्य सिद्धत्वादेव वर्द्धकौ लोभो जातः। तेनाधिकारित्वमायातम्।

"अवीक्ष्यात्मेश्वरीं काचिद्वृन्दावनमहेश्वरीम्।
तत्पदाम्भोजमात्रैकगतिर्दास्यति कातरा॥
पतिता तत्सरस्तीरे रुदत्यार्त्तरवाकुलम्।
तच्छ्रीवक्त्रेक्षणावाप्त्यै नामान्येतानि संजगा" वित्यत्र

'पतिता तत्सरस्तीरे' इति 'दासीति' च साधकायमानत्वेन साधकरूपमायातम्। "याते कञ्चुलि" रित्यत्र या केवलान्तर्दशा तस्या अभावात् "परित्यक्तः प्रेयोजनसमुदयै' रित्यत्र या केवलवाह्यदशा तस्या अभावाच्च। केवलवाह्यदशानां प्रेमसान्निध्यकेवलान्तर्दशासान्निध्यस्वरूपापकर्षकालस्वल्पत्वाधिक्यादिनोत्तमत्वादि। केवलान्तर्दशानां प्रेमसान्निध्यप्रातिलोम्यगतकेवलवाह्यदशा दूरत्वस्वरूपोत्कर्षवहुकालव्यापित्वाधिक्यादिनोत्तमत्वादि। आरोपितवाह्यदशार्द्धवाह्यदशान्तर्दशागतान्तर्दशानां प्रेमसान्निध्यकेवलान्तदशासान्निध्यस्वरूपोत्कर्षवहुकालव्यापित्वाधिक्यादिनोत्तमत्वादि। स्फूर्त्तिगतवाह्यार्द्धवाह्यदशा-

न्तर्दशागतान्तर्दशानां प्रेमसान्निध्यकेवलान्तर्दशासान्निध्य कालाल्पत्वादिनोत्तमत्वादि ॥

व्याख्या रिरंसामित्यादि पदद्वयस्यात्र सुबुद्धिभिः ।
सन्देहोच्छित्तये दृश्या श्रीमुकुन्दविनिर्म्मिता ।

सा व्याख्या यथा—

"रिरंसां श्रीनन्दनन्दनसुखार्थं रमणेच्छां सुष्ठु कुर्व्वन्नित्यनेन सिद्धरूपेण रागानुगाया ब्रजे सेवा सुष्ठु दर्शिता, वधिमार्गेणेति साधकरूपेण वैधभक्त्या चेति केवलेनेति रागानुगाभिश्रेण चेत्यादा मथुरायां महिषीत्वमितिभावः । अभिलाषे सत्यपि यथोचितसाधनेनैव तत्प्राप्तिरितिदर्शितम् । 'यद्वाञ्छया श्रीर्ललना चरत्तपो विहाय कामान् सुचिरं धृतव्रतेति'। वाञ्छन्ति यद्भवभियं मुनयो वयञ्चेत्यादिभिस्तद्वाञ्छायां सत्यामपि तदप्राप्तिः साधनवैषम्यादेवेति।" अत्र रिरंसां कुर्व्वन्नित्यधिकारिणो लुब्धत्वमायातम् । सुष्ठु ब्रजलोकानुसारं यथा स्यादिति । वैधभक्त्या चेत्यत्र वैधभक्त्या सेवा दर्शितेति पूर्व्वेणान्वयः । मथुरायां महिषीत्वमित्यस्य यादिति श्लोकगतक्रिययान्वयः । केवलेन विधिमार्गेणेति रागानुगामिश्रणेन विधिमार्गेणेति व्यतिरेको विना श्रीब्रजप्राप्तिर्दर्शिता । एताभ्यां व्यतिरेकाभ्यां सुष्ठुत्वस्य व्यतिरेकेण च गोलोकप्राप्तिः सूचिता पूर्व्वं लिखितत्वात् पुनरुक्तिभिया न दर्शिता । अत्राधिकारगतव्यतिरेकस्याविवक्षेति स न दर्शित इति ।

रागानुगाविवृत्तिर्या कृता पूर्व्वं पुनर्मया ।
तस्याः प्रव्यक्तये किञ्चिद्व्याख्यानमनुष्ठितमिति ॥
श्रीमुकुन्दकृते श्रीमद्रूपग्रन्थार्थनिश्चये ।
मतिर्यात् कृपया मे स श्रीकृष्णचरणो गतिः ॥

तटस्थरूपेऽभिमानोऽप्राकृतो न व्यतिरेकसिद्धः, वाधित-

प्राकृताभिमानान्वयात् । साधकरूपेऽभिमानोऽप्राकृतोऽपि न व्यतिरेकसिद्धः वाधिताप्राकृताभिमानान्वयात् । अभिमानस्य वाधितत्वादिविषयस्य वाधितत्वादेः, सिद्धरूपेऽभिमानोऽप्राकृतो व्यतिरेकसिद्धः' वाधिताप्राकृताभिमानान्वयाभावात् । केवलवाह्यदशायां वाधितप्राकृतवाधिताप्राकृतरूपावान्तरभेदद्वयविशिष्ट-यथास्थितरूपगताभिमानश्चातुष्पादिकः, वाधितप्राकृताभिमान-विषयाऽस्फूर्त्तेः, वाह्यदशायां वाधितप्राकृताभिमानविषयास्फुरणा-द्वाधिताप्राकृताभिमानास्त्रिपादात्मा अर्द्धवाह्यदशायां तस्मादेव पूर्वतः स्वल्पत्वाच्च वाधिताप्राकृताभिमानो द्विपादात्मा, अन्तर्दशायां तस्मादेव पूर्वतः स्वल्पत्वाच्च वाधिताप्राकृताप्राकृताभिमानः पादात्मा । वाह्यदशायां वाधिताप्राकृताभिमानस्य वाहुल्यादवाधिताप्राकृताभिमानविशेषस्याल्पत्वम् । अर्द्धवाह्य-दशायां वाधिताप्राकृताभिमानस्य मध्यमत्वादवाधिताप्राकृता-भिमानविशेषस्य वाहुल्यम् । सत्वस्य वाधितत्वे शुद्धसत्वस्य प्राधान्यम् । शुद्धसत्वस्य वाधितत्वे शुद्धसत्वविशेषस्य प्राधान्यम् । अतएव शुद्धसत्वप्राधान्येन तटस्थस्वरूपम् । शुद्धसत्व विशेषस्य प्राधान्ये साधकत्वम् । केवलशुद्धसत्वविशेषरूपत्वेन सिद्धरूपम् अतएव स्थूलं ताटस्थं वाधितं प्राकृतं सूक्ष्मं ताटस्थ्यं-यथा साधकरूपं क्वचिन्न जहाति तथा वाधि स्थूलं ताटस्थ्यं तटस्थरूपं क्वचिन्न जहाति । अतएव तटस्थरूपेऽभिमानस्य प्राकृतत्वमप्राकृतावाधिताभिमानांशा विवक्षया । किन्तु तटस्थरूपं स्वर्णस्थानीयम् । स्पर्शमणिस्थानीयावाधिताप्राकृताभिमानयोगात् साधकरूपं रत्नस्थानीयम् । ततोऽप्यधिकावाधिताप्राकृताभिमान-विशेषयोगात् । तटस्थरूपे वाधिताभिमानांशसद्भावान्न सदास्वरूप-संप्राप्तत्वरूपगुणांशः । यथा—"ये सत्यवाक्य इत्याद्या ह्रीमानि-त्यन्तिमा गुणाः । प्रोक्ताः कृष्णेऽस्य भक्तेषु ते विज्ञेया मनीषिभिः

साधकरूपे तत्तदंशाभावात्तदंशसद्भावः। यथा बुद्धिस्तदाश्रयेत्यत्र बुद्धेस्तदाश्रयत्वम्। वाधितप्राकृताभिमानविषयास्फूर्त्तेः। अभिमानस्य वाधितत्वेनैव ताटस्थस्य वाधितत्वम्। अभिमानस्य प्राकृतत्वेनैव ताटस्थस्य प्राकृतत्वम्। अवाधितसूक्ष्मताटस्थ्य वाधितस्थूलताटस्थ्यसम्पर्केणैव स्थूलशब्दवाच्यम्। 'दशा चतुष्टयं चेत् स्यात् स्फूर्त्यारोपौ विना क्वचित्। वाह्यादिवाधितं रूपं तटस्थं न तदा भवेत्'। रागानुगातटस्थलक्षणं रागानुगाधिकारिलक्षणगतम्। रागानुगास्वरूपलक्षणं रागानुगालक्षणगतम्। वैधभक्तेः स्वरूपलक्षणं सामान्य-साधनभक्तिगतम्। वैधभक्तेः तटस्थलक्षणं वैधभक्त्यधिकारिलक्षणगतम्। वैधभक्तिलक्षणे तु तत्तदनुवादमात्रम्। स्वरूपलक्षणतटस्थलक्षणे मिथः सापेक्षे। यथान्याभिलाषितेत्यत्र सामान्योत्तमभक्तेः विधेयत्वात्। स्वरूपलक्षणतटस्थलक्षणे मिथः सापेक्षे। वैधीरागानुगे विधेये। वैधीरागानुगयोस्तटस्थलक्षणविपर्य्यये वैधी स्वरूपं न त्यजति अन्वयसिद्धत्वात्। रागानुगा तु रागानुगा नहीति स्वरूपं हित्वा आभासत्वं प्राप्नोति व्यतिरेकसिद्धत्वात्। यथा सामान्योत्तमभक्तेस्तटस्थलक्षणान्यथात्वे भक्ति र्नहीति स्वरूपं विहाय आभासत्वं प्राप्नोति व्यतिरेकसिद्धत्वात्। यथा सामान्योत्तमभक्ते-र्व्यतिरेकसिद्धत्वात्। सामान्योत्तम-भक्तेः स्वरूपलक्षणसद्भावेऽपि तटस्थलक्षणाभावेन तत् प्रभेदरूपस्य भावस्य "मुमुक्षुप्रभृतीनाञ्चेद्भवेदेशा रतिर्नहि" इति स्वरूपत्यागेनाभासत्वम्। एवं सामान्योत्तमभक्तेर्व्यतिरेकसिद्धत्वात्। सामान्योत्तमभक्तेः स्वरूपलक्षणसद्भावेऽपि तटस्थलक्षणाभावेन तत्प्रभेदरूपायाः साधनभक्तेर्मुमुक्षुप्रभृतीनाञ्चेद्भवेदेषा साधना-भक्तिर्नहीति स्वरूपत्यागेनाभासत्वं न्याय्यम्। अतएव सामान्यभक्तेरुत्तमेति विशेषणोपादानं तटस्थलक्षणाभावप्राप्ताभासत्वापेक्षया। भक्तिरुत्तमा भक्त्याभासोऽनुत्तम इति, अन्यथा सर्व्वोपाधीति पदद्वयगत-

विधेयार्थतुल्यताभावेनास्य पदस्याप्रामाण्यापत्तेः पूर्वं रागानुगा-लक्षणं स्फुटत्वातिशयार्थं वैधभक्तेरेकदेशप्रदर्शनेन व्यतिरेकसि-द्धत्वमङ्गीकृत्य 'यत्र रागानवाप्तत्वादित्यत्र रागशब्दस्य व्याख्या-विशेषो दर्शितः। पश्चाद्रागानुगाव्यतिरेकसिद्धत्वनिष्पत्तये वैधभ-क्तेः सम्यक्तया प्रदर्शनेन तस्यान्वयसिद्धत्वं प्रदर्श्य व्याख्याविशेषो दर्शितः स च रागाल्लोभादिति। यदा वैधी रागानुगातः स्वरूपलक्ष-णतटस्थलक्षणाभ्यांभिन्नः तदा व्यतिरेकसिद्धा। यदा स्वरूपलक्ष-णेन वा तटस्थलक्षणेन वाऽभिन्ना तदाऽन्वयसिद्धा। अतएव वैधभक्तेः पृथक्त्वं सांघातिकश्चायातम्। सर्वोपाधीत्यादौ वैधभक्तेः किमुत रागानुगाभक्तेर्ज्ञानकर्म्मव्यतिरेकसिद्धत्वम्। "कृष्णं स्मरन्नित्यादौ निजसमीहितं कृष्ण----तत्प्रेष्ठजनान्यस्मरणकीर्त्तनश्रवणानि श्रीव्रजेतरस्थानवासश्च तटस्थरूपेणेत्यायातः। तेन रागानुगाया वैधीव्यतिरेकसिद्धत्वमायातम्। या ते कञ्चुलिरित्यादौ केवलान्त-र्दशायां यथास्थिततदेहस्फूर्त्त्यभावेन सिद्धरूपस्य तत्व्यतिरेकसिद्ध-त्वम्। किञ्च "ईश्वरे तदधीनेष्वि' त्यादौ तटस्थरूपगतवाधिताभि-मानांशसाधकरूपगतवाधिताभिमानांशसद्भावेनान्वयसिद्धत्वात्सा धकभक्तत्वम्। सर्वभूतेष्वित्यादौ तत्तदंशाभावेन व्यतिरेकसिद्धत्वात् सिद्धभक्तत्वं पूर्वत्र तदधीनेषु मैत्री साधकरूपगतवाधिताभिमानां-शसद्भावात्। वालिशेषु कृपा द्विषत्सूपेक्षा तटस्थरूपगतवाधिता-भिमानांशसद्भावात् परत्र सर्वभूतेषु भगवद्भावमिति तत्तदंशा-भावात्। तदधीनेषु भगवद्भावलोकनं तत्र प्रेमोत्पत्तेः सा च श्रीकृष्णे प्रेमोत्पत्तेः। प्रेममैत्रीत्यत्र प्रेमशब्देन भाव उच्येत। वालिशेषु द्विषत्सु च भगवद्भावावलोकनं। भगवद्भगवत् परिकरा न्याननुसन्धानात्। तच्च जातप्रेमत्वेन सदा केवलान्तर्दशा सद्भावात्। अतएव भगवद्भावोऽत्र भगवत्प्रेमा तदवलोकनं। तज्जातकेवलान्तर्दशानुरूपविलोकनात्। अतएव भूतानि भगवती-

त्यादि। अनिर्वचनीयभाग्यातिशयाज्जातश्रद्धाहेतुकवैधभक्तिचन्द्रकान्त्युदयपूर्वकृत— धर्म्मादितिमिरपराभवहेतुकतदपगमांशेनापि वैधभक्तेः कर्मज्ञानादिव्यतिरेकसिद्धत्वम्। यथा कृष्णतद्भक्तकारुण्यलाभमात्रैकहेतुकरागानुगासूर्य्यकान्त्युदयहेतुकपूर्वकृतवैधभक्तिरजन्यपगमांशेनापि रागानुगाया वैधभक्तिव्यतिरेकसिद्धत्वम्। तथा श्रद्धाहेतुकगुरुपादाश्रयस्य रजनीस्थानीयत्वम्। कृष्णतद्भक्तकारण्यलाभमात्रैकहेतुकगुरुपादाश्रयस्य सूर्य्यकान्तिस्थानीयत्वम्। प्रारब्धकृतं स्थूलशरीरं अनाद्यविद्याकृतं लिङ्गशरीरं श्रद्धालोभैकतरहेतुक श्रीगुरुपादाश्रयमात्रेण पूर्वं नश्यति परं प्रेमोत्पत्त्या सम्यङ् नश्यति। तत्पूर्वत्र क्रमेण ह्रासं प्राप्नोति। पूर्वनाशे देहान्तरं परनाशे पुनर्देहान्तरं रागानुगायां सिद्धरूपायाजातप्रेमत्वेन सिद्धायमानत्वात्।

तटस्थरूपस्य च पोषकत्वेऽपि साक्षादिष्टप्रापकत्वाभावात्। तयोरविवक्षया पूर्वं देहान्तरमेकं। अतएवास्य साधकत्वेन भक्तानां साधकाः सिद्धा इति भेदद्वयम्। श्रीकृष्णतद्भक्तकारुण्यलाभमात्रैक हेतुकश्रीगुरुपदाश्रयस्य पूर्वकृतवैधभक्त्यपगमकत्वेऽपि यदविद्या अनिर्वर्त्तित्वं तत्फलरूपप्रेमोत्कर्षख्यापनार्थम्। अविद्यानाशया प्रेम्नैव सम्यग्जायते न तु साधनेनेति किन्तु अविद्याया वाधितत्वेन तटस्थरूपगतया रागानुगाया तद्व्यतिरेकसिद्धत्वं दर्शितमेव। प्रयोगः—जातभावोऽपि भक्तः साधकः सूक्ष्मताटस्थ्यांशसद्भावात्। एवं जातान्तर्दशमपि रूपं साधकं सूक्ष्मताटस्थ्यांशसद् भावात्। केवलान्तर्दशायामन्तर्दशागतभावनायास्तिरोधानात् भावनामयसिद्धरूपस्य तद्व्यतिकरसिद्धत्वम् यथा ज्ञानमयकैवल्यस्य ज्ञाननाशान्निर्गुणत्वम् स्फूर्त्तौ भावनाया उपादानत्वम्, केवलान्तर्दशायां भावनाया उपादानत्वं निमित्तत्वञ्च। पूर्वत्र तत्प्रकृतवचेन मयट्। मयडर्थस्याऽमूर्त्तत्वं परत्र तद्विकारे तत्प्राधान्ये च मयट् तद्विकारस्याऽमूर्त्तत्वेन तत्तु श्रीनन्दनन्दनाचिन्त्य शक्त्या। तत्प्राधान्यं तन्निमित्तत्वेन निमित्ताभावे नैमित्तिकस्याऽ

भाव इतिन्यायप्राप्तेरन्तर्दशागतभावनाया अनुदयेन सिद्धरुपगत चेष्टादेरनुदयात् सिद्धरूपस्य मूर्त्तत्वेऽपि असाक्षाद्रूपत्वम् । सिद्धरूपस्य व्यतिरेकसिद्धत्वेऽपि रसालायां वस्तुद्वयस्येव साधकरूपेण सह समवेतत्वं नन्दनन्दनाचिन्त्यशक्त्या । 'अमुकस्य सुतोऽहं स्यां भ्राताहममुकस्य च । सुतो मेऽमुक इत्यादघभिमानः प्राकृतः स्मृतः ।। अमुकस्य सेवकोऽहं सतीर्थो मेऽमुकः किल । शिष्यो मेऽमुक इत्यादघोऽभिमानोऽप्राकृतः स्मृतः ।। मञ्जर्य्या अनुगाऽमुष्या अहं मे मञ्जरीत्वसौ सखी ममानुगा चासावित्यादिः प्राकृतेतरः ।। अभिमानविशेषोऽयं साध्यः पूर्वौ हि वाधितौ' । श्रीचन्द्रकान्तिः कामानुगीयभावप्रेम्णोरुदाहृता न तु कामानुगायाम् । सम्भोगेच्छामय्याः कामानुगायाः प्रदर्शिकायास्तस्याः कामानुगामुख्यप्रभेदरूपायां तत्तद्भावेच्छात्मिकायामनुसारस्याविवक्षितत्वात् । तस्याः कामानुगीयभावे उदाहरणं यथा-द्वितीयो यथा पाद्मे—

"इत्थं मनोरथं बाला कुर्व्वती नृत्य उत्सुका ।
हरिप्रीत्या च सर्व्वां तां रात्रिमेवेत्यवाहयत् ।।"

तस्याः कामानुगीयप्रेम्नि उदाहरणं यथा—
रागानुगीयभावोत्थो यथा पाद्मे—

"न पतिं कामयेत् कञ्चिद्ब्रह्मचर्य्यस्थिता सदा ।
तामेव मूर्त्तिं ध्यायन्ती चन्द्रकान्तिर्वरानना ।।
श्रीकृष्णगाथां गायन्ती रोमाञ्चोद्भेदलक्षणा ।
अस्मिन्मन्वन्तरे स्निग्धा श्रीकृष्णप्रियवार्त्तया" इति ।

श्रीमूर्त्तिमाधुरीदर्शनेन जातलोभत्वादस्याः सम्भोगेच्छामयीत्यर्थ रत्नाल्पदीपिका । प्रवोधनी निशानृत्यमाहात्म्यभरदर्शनी"त्यत्र नृत्यं साधकरूपकृतं रागानुगाङ्गं रासनृत्यानुकारित्वात् । तच्च "वल्लीष्वन्यासु नारीषु मय्येवाधिकप्रीतिमान् । नृत्यतासौ मया सार्द्धं कण्ठाश्लेषादिभावकृदि"त्यादिमनोरथद्योतितः सिद्धरूप-

कृतरासादिनृत्यत्वात्। एतच्च सिद्धसाधकरूपयोर्वीणावैणव-तुल्यत्वात्। सिद्धरूपगतत्रिविधरागानुगोदये साधकरूपगतरागा-नुगामयभावनामयनिमित्तत्वात्। सिद्धरूपेण रागानुगा चेत्तदा साधकरूपेण मानसीसेवा रागानुगा स्यात्। अतएव सत्य साधकरूपगतवाचिककायिकवैध्यंशाऽसम्भवेऽपि रिरंसामित्यत्रां केवलेनेति साधकरूपगत-वाचिक-कायिक-लोकापेक्षाकृत वैध्यं-शाऽन्याऽमिश्रणाऽपेक्षया। इयं मानसी रागानुगा स्फूर्त्तिरूपा। केवलेनेति व्यतिरेकप्रदर्शनगतसिद्धरूपगतस्फूर्तिः सिद्धरूपान्तर्भा-वात्तदमिश्रणाऽपेक्षया। मिश्रणं तु लोकापेक्षाकृतत्रिविधवैध्यं-शस्य च तत्समवेतायाः केवलाया वा स्वेष्टसम्पादकत्वेन कृतायास्तटस्थरूपकृतसेवायाश्च मिश्रणे सति साधकरूपकृतराग-नुगायाः प्राधान्येऽप्यप्रधानतया मिलनं मिश्रणंतु लोकापेक्षाकृत-वैध्यंशनाशे सति साधकरूपगतशुद्धरागानुगायां सत्यां तटस्थ-रूपाचरणांशस्य वैशिष्ट्ये सति तयोर्मिलनं साधकरूपेण रागानुगासिद्धरूपेण वैधीतिव्यतिरेकप्रदर्शनं स्थूलदृष्ट्या न तु सूक्ष्मदृष्ट्या। साधकरूपगतमानस्याः सेवाया वैधीत्वं विना सिद्धरूपेण सेवाया वैधीत्वं न स्यात्। अस्याः साधकरूपगतभाव-नानुरूपत्वात्। आश्रयस्य विनाभावादित्युक्तन्यायेन सिद्धरूपेण वैध्यां सत्यां साधकरूपगतमानसीसेवा वैधी स्यादेव। साधक-रूपेण मानस्यां सेवायां वैध्यां सत्यां तद्गतकायिकवाचिकरागा-नुगाप्रभेदयोर्दुघटत्वम्। अतएवास्वष्टादशवैधीषु इत्यष्टादशसंख्या स्वष्टादशवैधीष्वोका वैधी चेद्व्रजप्राप्तिर्नास्तीति सर्वथा व्रजलोका-नुसार एव कर्त्तव्य इति विज्ञापनप्रयोजना। अष्टादशानां प्रत्येक-व्यतिरेकासिद्धत्वस्य दुर्घटत्वात् तटस्थरूपाचरणस्य रागानुगातो भिन्नत्वेऽपि यद्रागानुगाव्यतिरेकप्रदर्शनं वैधीगतं तत्तु तटस्थ-रूपाचरणस्य रागानुगापोषकत्वात् यत्र रागानवाप्तत्वादित्यत्र

रागशब्दस्याथद्वयं दर्शितं । तत् श्रीनन्दनन्दनतद्भक्तकारुण्यलब्ध-मिति ज्ञेयम् । अतस्तेन क्रमेण लोभ-व्रजलोकानुसारावाक्षिप्येत ।

यथा वैणिकगां गीतिं विना वीणाभवा न सा ।
तथा साधकरूपस्थां बिना रागानुगा न सा ।।
सिद्धरूपगता ह्यत्र सन्देहो नैव विद्यते ।
सिद्धरूपस्य सत्यत्वासत्यत्वाभ्यां विचारतः ।।
तटस्थस्यापि रूपस्य ते स्यातां नात्र संशयः ।।
आचार्य्य आन्तरस्फोटं तस्मिन्नेव प्रकाशयेत् ।
यस्मिन् प्रकाशितः सोऽसौ तुल्यमेव व्रजेत्सदा ।

